# Chandrasekhara Aashtakam

चंद्रशेखर चंद्रशेखर चंद्रशेखर पाहिमाम् ।
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्षमाम् ॥

रत्नसानु शरासनं रजताद्रि शृंग निकेतनं
शिंजिनीकृत पन्नगेश्वर मच्युतानल सायकम् ।
क्षिप्रदग्द पुरत्रयं त्रिदशालयै रभिवंदितं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 1 ॥

मत्तवारण मुख्यचर्म कृतोत्तरीय मनोहरं
पंकजासन पद्मलोचन पूजितांघ्रि सरोरुहं ।
देव सिंधु तरंग श्रीकर सिक्त शुभ्र जटाधरं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 2 ॥

कुंडलीकृत कुंडलीश्वर कुंडलं वृषवाहनं
नारदादि मुनीश्वर स्तुतवैभवं भुवनेश्वरं ।
अंधकांतक माश्रितामर पादपं शमनांतकं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 3 ॥

पंचपादप पुष्पगंध पदांबुज द्वयशोभितं
फाललोचन जातपावक दग्ध मन्मध विग्रहं ।
भस्मदिग्द कलेबरं भवनाशनं भव मव्ययं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 4 ॥

यक्ष राजसखं भगाक्ष हरं भुजंग विभूषणम्
शैलराज सुता परिष्कृत चारुवाम कलेबरम् ।
क्षेल नीलगलं परश्वध धारिणं मृगधारिणम्
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 5 ॥

eAstroHelp
Your Astrology Helpline

भेषजं भवरोगिणा मखिलापदा मपहारिणं
दक्षयज्ञ विनाशनं त्रिगुणात्मकं त्रिविलोचनं ।
भुक्ति मुक्ति फलप्रदं सकलाघ संघ निबर्हणं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 6 ॥

विश्वसृष्टि विधायकं पुनरेवपालन तत्परं
संहरं तमपि प्रपंच मशेषलोक निवासिनं ।
क्रीडयंत महर्निशं गणनाथ यूथ समन्वितं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 7 ॥

भक्तवत्सल मर्चितं निधिमक्षयं हरिदंबरं
सर्वभूत पतिं परात्पर मप्रमेय मनुत्तमं ।
सोमवारिन भोहुताशन सोम पाद्यखिलाकृतिं
चंद्रशेखर एव तस्य ददाति मुक्ति मयत्नतः ॥ 8 ॥

फलशृति
विश्वसृष्टिविधायिनं पुनरेव पालनतत्परं
संहरंतमपिप्रपंचमशेषलोकनिवासिनम् ।
क्रीडयंतमहर्निशं गणनाथयूथसमन्वितं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 9 ॥

मृत्युभीत मृकंडुसूनुकृतस्तवं शिवसन्निधौ
यत्र कुत्र च यः पठेन्न हि तस्य मृत्युभयं भवेत् ।
पूर्णमायुररोगतामखिलार्थसंपदमादरं
चंद्रशेखर एव तस्य ददाति मुक्तिमयत्नतः ॥ 10 ॥

eAstroHelp
Your Astrology Helpline